1. गुणत्वजातौ प्रमाणं साधयत।

उ. द्रव्यकर्मभिन्नं सामान्यवति या कारणता सा, किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् इति अनुमानं, गुणत्वजातौ प्रमाणं। नहि रूपत्वादिकम् सत्ता वा तत्रावच्छेदिका न्यूनाधिकदेशवृत्तित्वात् अतश्चतुर्विंशति अनुगतं किञ्चिद् वाच्यं तदेव गुणत्वं इति सिद्धम्।

2. पाकप्रक्रियायां वैशेषिकमतं सोदाहरणं लिखत

उ. एतेषां - रूपरसगन्धस्पर्शानाम्। पृथिव्यां हि रूपरसगन्धस्पर्शपरावृत्तिरग्निसंयोगात् उपलभ्यते, नहि शतधाऽपि ध्यायमाने जले रूपादिकं परावर्तते, नीरे सौरभमौष्ण्यं चान्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत्। तत्राऽपि - पृथिवीष्वपि मध्ये, परमाणावेव रूपादीनां पाक इति वैशेषिका वदन्ति। तेषामयमाशयः - अवयविना - ऽवष्टब्धेष्ववयवेषु पाको न सम्भवति, परन्तु वह्निसंयोग - नाऽवयाविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः, पुनश्च पक्वपरमाणु- संयोगात् द्व्यणुकादिप्रक्रमेण पुनर्महावयविपर्यन्तमुत्पत्तिः तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्च।

3. न्यायदिशा पाकप्रक्रियां उपस्थापयत।

"नैयायिकानां तु नये द्व्यणुकादावपीष्यते"

नैयायिकानां मते द्व्यणुकादाववयविन्यपि पाको भवति। तेषामयमाशयः, अवयविनां सच्छिद्रत्वाद्वह्नेः सूक्ष्मावयवैरन्तः प्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते। अनन्तावयवितन्नाशकल्पने गौरवम्। इत्थं च सोऽयं घट इत्यादिप्रत्यभिज्ञाऽपि सङ्गच्छते। यत्र तु न प्रत्यभिज्ञा, तत्राऽवयविनाशोऽपि स्वीक्रियत इति।

4. द्वित्वोत्पत्तिनाशप्रक्रियां निरूपयत।

द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मता ॥
अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥

द्वित्वादयो व्यासज्यवृत्तिसंख्या अपेक्षाबुद्धिजन्याः। यद्यपि द्वित्वादिसमवायः

Scanned with CamScanner

प्रत्येकं घटादावपि वर्तते, तथाऽपि एको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्याप्तिलक्षणं कश्चित् सम्बन्धोऽनेकाश्रयोऽस्ति, प्रथममपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पात्मकं, ततो द्वित्वत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च, ततो द्वित्वनाश इति

5. विभिन्नकारणेभ्यः परिमाणोत्पत्तिं सोदाहरणं प्रतिपादयत।

3 परिमितिव्यवहारसाधारणं कारणं परिमाणमित्यर्थः तच्चतुर्विधम् अणु, महत् दीर्घं ह्रस्वं चेति। नित्येषु द्रव्येषु परिमाणं नित्यं भवति। अनित्येषु द्रव्येषु अनित्यं भवति। अनित्यं परिमाणं त्रिविधं संख्याजन्यं, परिमाणजन्यं, प्रचयजन्यं चेति। द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकपरिमाणम् वा न कारणम् परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात्, द्व्यणुकस्याऽणुपरिमाणं तु परमाण्वणुत्वापेक्षया नोत्कृष्टम्, त्रसरेणुपरिमाणं तु न सजातीयं, अतः परमाणौ द्वित्वसङ्ख्याद्व्यणुकपरिमाणस्य, द्व्यणुके त्रित्वसङ्ख्या च त्रसरेणुपरिमाणस्यासमवायिकारणम्।

6. विभागजविभाग स्वीकारे युक्तिं दर्शयत।

3 विभागजविभाग कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति द्विविधाः, आद्यस्तावद्यत्रैककपाले कर्म ततः कपालद्वयविभागः ततो घटारम्भकसंयोगनाशः ततो घटनाशः ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याऽऽकाश विभागो जन्यते, तत आकाशसंयोगनाशः तत उत्तरदेशसंयोग, तत कर्मनाश इति। न च तेन कर्मणैव कथं देशान्तरविभागो न जन्यते इति वाच्यम्। एकस्य कर्मणा आरम्भकसंयोग प्रतिद्वन्दविभाग-जनकत्वस्याऽनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात्। अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात् तस्माद्यदोदमनारम्भकसंयोगप्रतिद्वन्द्विविभागं न जन्यते न च कारणविभागेनैव द्रव्यनाशात् पूर्वं कुतो देशान्तरविभागो न जन्यते इति वाच्यम्। आरम्भकसंयोगप्रतिद्वन्द्विविभावतोऽवयवस्य सति द्रव्ये देशान्तरविभाग-सम्भवात्। द्वितीयस्तवद्यत्रहस्तक्रियया हस्ततरुविभागस्ततः शरीरेऽपि विभक्त-प्रत्ययो भवति, तत्र शरीरतरुविभाग हस्तक्रिया न कारणं, व्याधिकरणत्वात्, शरीरे

तु क्रिया नास्त्येव, अवयविकर्मणो यावदवयवकर्मनियतत्वात्, अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यत इति। अत एव विभागो गुणान्तरं, अन्यथा शरीरे विभक्तप्रत्ययो न स्यात्, अतः संयोगनाशेन विभागो नाऽन्यथासिद्धो भवति।

7. परत्वापरत्वं वर्णयत

3 "परत्वं चाऽपरत्वं च द्विविधं परिकीर्तितम्"

अयं अस्माद् परं इति व्यवहार असाधारणं कारणं परत्वं। अयं अस्माद् अपरं इति व्यवहार असाधारणं कारणं अपरत्वं। परत्वं द्विविधं दैशिकपरत्वम् कालिकं परत्वमिति। अपरत्वमपि द्विविधं। दैशिकापरत्वम् कालिकापरत्वं इति। दैशिकपरत्वं बहुतरमूर्तसंयोगान्तरितत्वज्ञानादुत्पद्यते, एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते अत्रावधित्वार्थं पञ्चम्यपेक्षा यथा 'पाटलिपुत्रात् काशीमपेक्ष्य प्रयागः परः' 'पाटलिपुत्रात् कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति। ज्येष्ठे कालकृतं परत्वं। कनिष्ठे कालकृतं अपरत्वं

यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यपरिस्पन्दोऽधिकः, स ज्येष्ठः, यस्य न्यूनः स कनिष्ठः। कालिकपरत्वापरत्वे जन्यद्रव्ये एव अपेक्षाबुद्धिनाशात् तयोः नाशः।

8. संशय कारणं यथाग्रन्थं प्रदर्श्यताम्

"साधारणादिधर्मस्य ज्ञानं संशयकारणं"

एकधार्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयः। उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणं। यथा उच्चैस्तरस्त्वं स्थाणुपुरुषसाधारणं ज्ञात्वाऽयं स्थाणुर्न वेति सन्दिग्धे। एवमसाधारणधर्मज्ञानं कारणं यथा शब्दस्य नित्यानित्यव्यावृत्तेन शब्दे गृहीतत्वाच्छब्दो नित्यो न वेति सन्दिग्धे। विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादि शब्दात्मिका न संशयकारणं, शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात् किं तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते, संशयस्तु मानस एवेति। एवं ज्ञाने प्रामाण्य संशयाद्विषयसंशय इति। एवं व्याप्यसंशयादपि व्यापक संशय इत्यादिकं बोध्यम्। किं तु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणं

9. प्रमात्वस्य स्वतोग्राह्यत्वं ग्रन्थोक्तदिशा निराकुरुत

Scanned with CamScanner

3 मीमांसका हि प्रमात्वं स्वतोग्राह्यमिति वदन्ति। तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशत्वात्ज्ज्ञानप्रामाण्यं तेनैव गृह्यते। भट्टानां मते ज्ञानं अतीन्द्रियं, ज्ञानजन्यज्ञातता प्रत्यक्षा, तया च ज्ञानमनुमीयते। मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते। सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते, विषयानिरूप्यं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषयः, तन्मतं दूषयति। यदि ज्ञानस्य प्रामाण्यं स्वतो ग्राह्यं स्यात्, तदाऽनभ्यासदशापन्न ज्ञाने प्रामाण्यसंशयो न स्यात् तत्र हि यदि ज्ञानं ज्ञातं, तदा तन्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः? तस्माद् ज्ञाने प्रामाण्यमनुमेयं तदा हि इदं ज्ञानं प्रमा, संवादिप्रवृत्तिजनकत्वात्, यन्नैवं तन्नैवं यथाऽप्रमा। इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा, गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात्, एवमिदं जलत्वप्रकारकं ज्ञानं प्रमा, स्नेहवति जलत्वप्रकारकज्ञानत्वात्। न च हेतुज्ञानं कथं ज्ञातमिति वाच्यम्। पृथिवीत्वप्रकारकाय स्वतोग्राह्यत्वात्, तत्र गन्धग्रहेण गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात्, तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संशयानुरोधात्।

10. परतः प्रामाण्यं विवेचयत?

अथवा

सर्वेषां ज्ञानानां यथार्थत्वे का क्षतिः?

3 (9th answers +) ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणम् व्यर्थम्। न च रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात्, तव मते भ्रमस्याऽभावादिति वाच्यम्। तत्र हि दोषाधीनस्य पुरोवर्तिनि स्वतन्त्रोपस्थितरजत-भेदाग्रहस्य हेतुत्वात्। सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्वात् एव कारणं अस्तु वा तत्राऽपि रजतभेदाग्रहः, स एव कारणमिति। न चाऽन्यथाख्यातिः सम्भवति, रजतप्रत्यक्षकारणस्य रजतेन्द्रियसन्निकर्षस्याभावात्। रङ्गे रजतबुद्धेरनुपपत्तिरिति चेन्न। सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः कॢप्तत्वात् अन्यत्राऽपि तत्कल्पनात्। न च संवादिप्रवृत्तौ तत्कारणं, विसंवादिप्रवृत्तौ च भेदाग्रहः कारणमिति वाच्यम्। लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात्। इत्थं च रङ्गे रजतत्व विशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणप्रत्यासत्तिकल्पनेऽपि न क्षतिः, फलमुखगौरवस्यादोषत्वात्। किं च रङ्गरजतयोरिमे रजते रङ्गे वेति ज्ञानं यत्र जातं

Scanned with CamScanner

तत्र न कारणबाधोऽपि । अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्याताम् । रङ्गे रङ्गभेदग्रहे रजते रजतभेदाग्रहस्य चान्यथाख्यातिस्यात्, तन्मते दोषादेव रङ्गे रजतभेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवद्भेदाग्रहादनुमितिर्निराबाधा । यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूमज्ञानमनुमित्यनुकरोधादापतितम् । इत्थञ्चान्यथाख्यातौ प्रत्यक्षमेव प्रमाणं, रङ्गं रजततया जानामीत्यनुभवादिति संक्षेपः ।

11. व्याप्तिग्रहोपायं निरूपयत

3

व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा
हेतुर्व्याप्तिग्रहे, तर्कः क्वचिच्छङ्कानिवर्तकः ॥

व्यभिचारग्रहः सहचारग्रहश्च व्याप्तिग्रहेकारणमित्यर्थः । व्यभिचाराग्रहस्य व्याप्तिग्रहे प्रतिबन्धकत्वात् तदभावः कारणं । एवं अन्वयव्यतिरेकाभ्यां सहचार-ग्रहस्यापि हेतुता । भूयोदर्शनं तु न कारणं व्यभिचारास्फूर्तौ सकृद्दर्शनेऽपि क्वचिद् व्याप्तिग्रहात् क्वचिद्व्यभिचारशङ्काविधूनदारा भूयोदर्शनमुपयुज्यते । यत्र तु भूयोदर्शनादपि शङ्का नापैति तत्र विपक्षे बाधकस्तर्कोऽपेक्षितः ।

12. नित्यनैमित्तिककाम्यकर्मणां भेदं प्रकटयत ।

3 सन्ध्यावन्दादीनि अहरहनुष्ठेयानी नित्यकर्माणी, तेषां अकरणे प्रत्यवायः (पापः) स्यात् । यत्किञ्चित् निमित्ते प्राप्ते निमित्तकर्माणि । यथा ग्रहणकाले ग्रहणादि निमित्तेन क्रियमाणानि जपदानतर्पणादीनि । जातकर्मादिकमपि अत्र भवति । यत्किञ्चित् विशिष्टं फलं काम्यन क्रियमाणानि कर्माणि काम्यकर्माणि यथा पुत्रकामेष्ट्यादि

13. उपाधिलक्षणं विमृश्य उपाधेर्दूषकताबीजत्वं निर्दिशत ।

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा
स उपाधिर्भवेत् तस्य निष्कर्षोऽयं प्रदश्यते

साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापक उपाधिः । ननु स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वं नोपाधिः स्यात्, तस्य साध्यव्यापकत्वाभावात् श्यामत्वस्य घटादावपि सत्वात्, एवं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूत-

Scanned with CamScanner

त्यादावनुष्णाशीतस्पर्शवत्त्वम् । न चात्र स्वरूपासिद्धिरेव दूषणमिति वाच्यम् । सर्वत्रोपाधेर्दूषणान्तसाङ्कर्यात् अत्र च साध्यव्यापकः पक्षावृत्तिरूपाधीरिति वदन्ति ।

15. शब्दोपमानयोः प्रमाणान्तरत्वं निर्दिशत

अथवा

प्रमाणविषये वैशेषिकमतमुपस्थया तन्निरूपयत

3 वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणम्, शब्दोपमानयोस्त्वनुमानविधयैव प्रामाण्यम् । तथाहि दण्डेन गामभ्याजेत्यादिपदानि वैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि, आकांक्षादिमत्पदकदम्बत्वात्, घटमानयेति पदकदम्बवत्, येद्वेते पदार्थमिथः संसर्गवन्तः, योग्यतादिमत्पदोपस्थापितत्वात्, तादृशपदार्थवत् । दृष्टान्तेऽपिदृष्टान्तान्तरेण साध्यसिद्धिरिति । एवं गवयव्यक्तिप्रत्यक्षानन्तरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकम्, असति वृत्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात् । असति च वृत्यन्तरे यद्यत्र वृद्धैः [illegible] प्रयुज्यते तत्तत्प्रवृत्तिनिमित्तकं यथा गोपदं गोत्वप्रवृत्तिनिमित्तकं । यद्वा गवयपदं सप्रवृत्तिनिमित्तकं, साधुपदत्वादित्यनुमानेन पक्षधर्म्मताबलाद् गवयत्वप्रवृत्तिनिमित्तकत्वं भासते । न हि सर्वत्र शब्द श्रवणाद्यनन्तरं व्याप्तिज्ञाने मानमस्तीति । किं च सर्वत्र शाब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्वत्रानुमिति स्थले पदज्ञानं कल्पयित्वा शाब्दबोध एव किं न स्वीक्रियत इति ध्येयम् ।

16. अर्थापत्तेः प्रमाणान्तरत्वमुपपादयत

अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ।
व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ॥

अर्थापत्ति प्रमाणान्तरं केचन मन्यन्ते । तथाहि यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिः शास्त्रादवगतं जीविनो गृहासत्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीवत्वान्यथानुपपत्या बहिःसत्वं कल्प्यते । तदप्यनुमानेन गतार्थत्वन्नेष्यते । तथाहि यत्र जीवित्वस्य बहिःसत्वगृहसत्वव्याप्यत्वाद्बहिःसत्वमनुमितौ भासते । एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनं सिद्ध्यति ।

दिवाभोजनबाधो च रात्रिभोजन सिद्ध्याति।

अभावप्रत्यक्षस्याऽऽनुभविकत्वादनुपम्भोऽपि न प्रमाणान्तरम्। किं चानुपलम्भस्याज्ञातस्य हेतुत्वं ज्ञानाकरणकत्वात् प्रत्यक्षत्वं, ज्ञातस्य हेतुत्वे तु तत्राप्यनुपलम्भान्तरापेक्षेत्यनवस्था। एवं चेष्टापि न प्रमाणान्तरम्।